© 2019 IJSRSET | Volume 6 | Issue 3 | Print ISSN: 2395-1990 | Online ISSN : 2394-4099
Themed Section : Mathematics

# व्याकरण-न्याय-मीमांसाशास्त्रदृष्ट्या अधिगमस्वरूपम्

आचार्या एन्. लता
आचार्या, शिक्षाविभाग:,राष्ट्रियसंस्कृतविश्वविद्यालय:, तिरुपति:

प्राचीनभारतीयदार्शनिका: न्यायवैषेशिकमीमांसादि शास्त्रेषु प्रत्यक्षम्, अनुमानम्, उपमानम्, शब्द:, अर्थापत्ति इत्यादि नवप्रमाणानि ज्ञानसाधनानि इति प्रमाणयन्ति स्म। तान्येव प्रतिपादिततत्त्वानि मनोविज्ञानम् आदीनि पाश्चात्यदार्शनिकै: शिक्षाशास्त्रिभि: प्रमाणितानि। अत: किं तत् दार्शनिकतत्वं तै: विचारितम् इति चेत् आप्तवाक्यम् एकम् अधिगमस्वरूपं भवति इति क्रमश: न्याय-व्याकरण-मीमांसाशास्त्राधारेण सोदाहरणम् अध: प्रस्तूयते -

आप्तवाक्यं नाम शब्दप्रमाणम्, आप्तवचनम्, आप्तोपदेश: इति संस्कृतवाङ्मये बहधा व्यवह्रियते। सामान्यत: व्यक्ते: ज्ञानसञ्चयस्य अधिकांश: भाग: शब्देनैव अधिगत: भवति। यथा वेदोक्तशब्दराशि: प्रमाणत्वेन अङ्गीक्रियते । वेदो एव शब्द:, शब्द एव वेद: य: आप्तरूपेण गणित: भवति ।

आधुनिककाले शब्द: उच्चारित: लिखितश्चेति परिगण्यते । शब्दश्च आप्तस्य अभिप्रायम् अभिव्यनक्ति । आप्तस्तु नियमेन विश्वसनीयश्रोतु: ज्ञाने परिवर्तनापादक: तन्मुखात् क्रियाया: प्रभावक: यथार्थवक्ता च भवति । यदि शिक्षक: आप्त: भवति चेत् छात्रस्य प्रवर्तने परिवर्तनं विकासं वा अवश्य मानयेत् । एतदेव उक्तं न्यायमते।

**न्यायमते शब्दप्रमाणलक्षणम्-** आप्त: खलु साक्षात् कृतधर्मा यथादृष्टास्यार्थस्य चिख्यापयिषया प्रयुक्त - उपदेष्टा साक्षात् करणमर्थस्य आप्ति: तया प्रवर्तत इत्याप्त: इति । आप्तो हिताहितप्राप्तिपरिहारप्रयोजनं रागद्वेषादि- वैयक्तिकगुणान् अपहृत्य विपरीतोपदेशप्रवृत्तिविहीन: यथा अदृष्टार्थोपदेशक: अकारुण्यस्वार्थकामादि-विहीन: अनलस: उपदेष्टा एव आप्त: भवितुमर्हतीति ।

वस्तुत: ऋषय: आर्या: एव आप्ता: येषामुपदेश: तै: उच्चारितम् आकाङ्क्षा-योग्यता- सन्निधियुक्तपदसमूहं वाक्यं शब्द: इति शब्दलक्षणं सिध्यति। एतदाधारेण शिक्षाक्षेत्रे शिक्षक: छात्रं संज्ञानात्मकवेगात् भावात्मकचलनात्मकवेगपर्यन्तं आप्तारूपेण सन्मार्गायिदम् उपदिशतीति । एवं सति श्रोत्रग्राह्यं वस्तु शब्दप्रमाणं भवति ।

**एवं तर्कसङ्ग्रहे आप्तशब्द: एवं प्रकथित:-** आप्तवाक्यं शब्द: इति । आप्तोच्चरितत्वे सति वाक्यत्वं शब्दस्य लक्षणम् । अत्र आप्तत्वं नाम प्रयोगहेतुभूतयथार्थज्ञानवत्वमेव। अत एव न्यायबोधिनीग्रन्थे प्रयोगाहेतुभूत- यथार्थज्ञानजन्यशब्दत्वमिति पर्यवसितार्थ: दर्शित:। नीलकण्ठप्रकाशिकायां प्रकृत- वाक्यार्थगोचरयथार्थज्ञानजन्यवाक्यं प्रमाणशब्द: इति निष्कर्ष: दर्शित:। तर्कसंग्रहव्याख्यायां वाक्यवृत्तौ प्रकृतवाक्यार्थविषयक-यथार्थशाब्दबोधविषयक-तात्पर्यवान् इति उक्त्वा एतादृशतात्पर्यजनकवाक्यत्वं प्रमाणशब्दत्वमिति पर्यवसित: अर्थ: प्रकाश्यते। एवं नरसिंहप्रकाशिकायाम्

Received : May 10, 2019 | Accepted : June 15, 2019 | May-June-2019 [ 6 (3) : 495-498]

आप्तरूपप्रमातृकर्तृकवाक्यत्वापेक्षया प्रकृतवाक्यार्थ- विषयकप्रमाजन्यवाक्यत्वस्य एव शब्दप्रमाणलक्षणत्वे औचित्यम् प्रादर्शि । एवं बहुषु ग्रन्थेषु आप्तशब्दविचारः कृतः ।

आप्तस्तावत् प्रकृतवाक्यार्थविषयकयथार्थज्ञानप्रयोज्य शब्दोच्चारणकर्ता भवति । शब्दशक्ति-प्रकाशिकाग्रन्थे जगदीशतर्कालङ्कारैः मङ्गलश्लोकमुखेन शब्दलक्षणं प्रादर्शि -

**अनुभवहेतुः सकले सद्यः समुपासिता मनुजे ।**

**साकाङ्क्षा सन्न च स्वार्थे योग्या सरस्वती देवी ॥** इति

तथा च अनुभवजनकसाकाङ्क्षासन्नयोग्यपदसमूहात्मकं ज्ञायमानं वाक्यं शब्दप्रमाणमिति लक्षणं संकेतितं भवति ।

**व्याकरणे शब्दप्रमाणलक्षणम्-** लघुमञ्जूषायाम् आचार्यः नागेशः तत्तद्वाक्यव्यङ्ग्यस्फोटस्यैव अर्थबोधकत्वेन प्रमाणत्वे अपि लौकिकदृष्ट्या व्यञ्जकशब्देऽपि प्रमाणत्वमस्तीति समालोच्य आप्तोपदेशरूपः शब्दः प्रमाणम् इति प्रादर्शयत् ।

आप्तः नाम अनुभवेन वस्तुतत्त्वस्य कात्स्न्येन निश्चयवान्, रागादिवशादपि क्वचित् न अन्यथावादी यः सः आप्तः इति दर्शितवान् ।

अपि च आप्तोपदेशशब्दस्य आप्तश्चासौ उपदेशः आप्तस्य उपदेशः इति द्वेधा विग्रहं विभाव्यम् आप्तत्व-आप्तोक्तत्व-अन्यतरवान् उपदेशः इत्यर्थः च प्रादर्शि । एवं सति नागेशोक्तलक्षणम् अपौरुषेयस्य वेदस्य स्वतः एव आप्तत्वम्, पौरुषे यस्य वाक्यस्य तु आप्तोक्तत्वम् उभयानुकूलं भवति । एवं भारतीयदर्शनेषु शब्दलक्षणमधिकृत्य बहुधाविचारः दृश्यते । सर्वत्र आप्तोपदेशः इति तु सामान्यतया अङ्गीक्रियते एव ।

**मीमांसामते शब्दप्रमाणलक्षणम्-** मीमांसादर्शने वाक्यशास्त्रमिति प्रथिते आप्तोपदेशस्य वेदस्य विषये महान् विचारः दृश्यते । जीवः शब्दं श्रुत्वा यथा तिङ्गादिक्रियापदानि श्रुत्वा कथं प्रवर्तेत इति महान् विचारः दृश्यते । सामान्यतया क्रियापदे धातुः प्रत्ययः इति भागद्वयमस्ति । प्रत्ययेन धात्वर्थः इच्छा च ज्ञायते । धात्वर्थस्य प्रतिपादनं सर्वेषु लकारेषु समानं भवति । इच्छार्थस्य प्रतिपादनं प्रत्ययस्य विशिष्टः गुणः भवति । परन्तु धात्वर्थः प्रत्ययः इति उभयमपि सर्जनशक्तिम् अर्थात् भावनामेव निर्दिशति । मीमांसकैः अङ्गीक्रियमाणः अयं भावनाशब्दः मनोविज्ञानदिशा सर्जनशक्तिम् उत्पादकशक्तिं किंचन अभिज्ञातुं प्रवृत्तिं वा निर्दिशति । भावनया उत्पादकाभिकरणस्य भावयित्र्याः विशिष्टाक्रिया अवगम्यते, या च कस्यचित् अस्तित्वं बहिरानेतुं प्रवर्तते । अत एव मीमांसकैः भावयित्री नाम भविष्यदस्तित्वमिति निरूप्यते । तादृशोत्पादकशक्तिः शब्दार्थरूपेण द्वेधा भवति । तच्च मीमांसकैः शाब्दीभावना, आर्थी भावना इति निरूप्यते । शाब्दीभावनया सर्जनात्मकाभिकरणस्य, यच्च अभिकरणं जीवं कार्ये प्रवर्तयति, विशिष्टक्रिया अधिगम्यते । अत्र 'सः मां प्रेरयति, सः स्वशक्त्या कार्यं कर्तुं चोदयति' इत्यादि रूपेण जीवे भावना उदेति । एतेन सामान्यात् विशिष्टं प्रति इति सिद्धान्तमाश्रित्य अधिगमः प्रवर्तते ।

'गामानय' इत्यादि स्थले गो शब्देन गोत्वम् आनयशब्देन आनयनक्रिया च बुध्यते । लोके तु एतादृशः बोधः सम्भवति । वेदस्य अपौरुषेयत्वात् उच्चरितुः पुरुषस्य अभावात् उभयमपि तत्वं शब्दे एव निहितं भवति । एतदेव मनसि निधाय मीमांसकैः शाब्दीभावना निरूप्यते ।

भावना च अङ्गत्रययुक्ता भवति । साध्यं, साधनं - येन परिणामः अधीगम्यते, इति कर्तव्यता - येन च परिणामः प्रभाव्यते तथा च एतैः तत्वैः आकाङ्क्षात्रयं समाहितं भवति । कः परिणामः? केन वा परिणामः प्रभाव्यते ? इति ।

आर्थीभावनया साध्येच्छा एवं त्रेधा अनुभूयते । समानाभिमानश्रुतौ शाब्दीभावना आर्थी भावना च एकेनैव इच्छारूपेण आविष्कृते भवत: । यजेत प्रभृतय उभयभावना प्रतिपादका: भवन्ति। आर्थिभावना व्यक्तिविशेषस्य क्रियासम्बन्धिनी विशिष्टा शक्ति: भवति । इयमेव आर्थीभावना यजेत प्रभृति शब्देषु क्रियापदेन संकेत्यते । इयमपि आर्थी भावना साध्यं साधनप्रक्रियेति अर्थात् साध्यं साधनमितिकर्तव्यता इति अङ्गत्रययुक्ता आकाङ्क्षात्रयं समादधाति। यदि इयं प्रक्रिया मनोविज्ञानदिशा अधिगमप्रक्रियात्वेन परिवर्त्यते तर्हि आप्तवाक्याधिगमप्रक्रीया प्राप्येत।

The instrument asked by then any action present itself as the instrument for which the result is obtained if the mode of action is asked for all the subsidiary matters present themselves and point out the mode of action इति भावना कल्पनाया: आप्तवाक्याधिगमप्रक्रियात्वेन मनोविज्ञानदिशा निरूपणम् सम्भवति । तथापि एतादृश निरूपणं भारतीयदर्शने प्रतिपादितं शब्दलक्षणं शब्दप्रामाण्यमित्यादिविषयेषु उत्तमम् अभिबोधं काङ्क्षते ।

यथा न्यायशास्त्रे विशेषत: शब्दलक्षणं शब्दप्रामाण्यं च बहुधा विचारितं दृश्यते, यदस्माभि: न्यायमताधारेण शब्दलक्षणस्य तत् प्रामाण्यस्य च विचार: कृत: वर्तते ।

शब्दजन्यं ज्ञानं शाब्दबोध: इत्युच्यते । शाब्दबोधस्य कारणात् शब्द: प्रमाणं भवति । शब्दप्रामाण्यविषये दर्शनकारेषु मतभेद: दृश्यते ।

**निष्कर्ष**:- आप्तवाक्याधिगमसिद्धान्त: भारतीयदर्शनावलम्बी भवति । भारतीय दर्शनेषु आप्तोपदेशस्य आप्तवाक्यस्य शब्दस्य महत्वं दृश्यते । व्यवहारानां परिवर्तने आप्तवाक्याधिगम: साक्षात् सारल्येन प्रभावी रूपेण प्रवर्तते । वस्तुत: मानवज्ञानस्य सारल्येन उपलब्धिसञ्चय: च आप्तवाक्येन सम्भवति । अत एव Bandura प्रभृतय: आप्तवाक्यसदृशं समाजाधिगमसिद्धान्तं प्रावर्तयन् । वस्तुत: अयं आप्तवाक्याधिगम: भारतीयानां कृते न नूतन: यत: प्रमाकरणत्वेन शब्दप्रमाणस्य आप्तोपदेशस्य आप्तवाक्यस्य स्वीकार: भारते आवेदसाहित्यात् अवलोक्यते । अयं विषय: अत्र अवधेय: भवति । आप्तवाक्याधिगम: भारते प्राधान्येन आस्तिकै: पारम्परिकै: धार्मिकै: दार्शनिकै: एव प्रवर्तित: विकासित: । भारतदर्शनेषु ज्ञानस्वरूपं तत् साधनानि तदधिगमप्रकारा: इत्येतत् सर्वं प्रमाणशास्त्रेषु विचारितं वर्तते तस्मिन् एव क्रमे दार्शनिकै: प्रत्यक्षाद् आरभ्य विविधप्रमाणानि निरूपितानि वर्तन्ते । दार्शनिकानां कृते ब्रह्मण: अतीन्द्रियसंप्रत्यायानां सूक्ष्मसंप्रत्ययानां निरूपणार्थं ज्ञानसाधनानि अपेक्षितानि आसन् । अत एव ते बहुधा प्रमाणानि निरूपितवन्त:। तेषु प्रमाणेषु अतीन्द्रियसंप्रत्ययानां निरूपणे अपेक्षादृष्ट्या शब्द: एव समर्थ: आसीत् । अयमेव शब्द: प्रकृताध्ययनस्य विचार्य: विषय: ।

विश्वसनीयेन यथार्थज्ञानिना रागादिहीनेन आप्तेन उपदिश्यमानं सर्वमपि यथार्थमेव भवति । एतेन अधिगन्तॄणां क्रियायाम्, अभिवृत्तौ, मूल्येषु, विश्वासेषु च यथापेक्षं परिवर्तनं सम्भवति । इदमेव व्यावहारिकपरिवर्तनम् अधिगम: इति पाश्चात्यमनोविज्ञानिभि: कीर्त्यते । तथा च आप्तवाक्यं व्यक्तौ तादृशपरिवर्तनम् आनेतुं सक्षममिति कारणात् आप्तवाक्यस्य अधिगमव्यूहत्वं सिध्यति । प्राचीनकाले मीमांसकै:, धर्मशास्त्रकारैश्च कर्तव्याकर्तव्यादिकं कारणादिनिरूपणं विना शब्दै: बोध्यते स्म ।तादृशशब्दै: व्यक्ति: प्रभाविता प्रेरिता च तत्रोक्तं सर्वम् अनुपालयति स्म ।अर्थात् शब्दै: व्यक्तिव्यवहारे परिवर्तनं जायते स्म । परिवर्तनकारकम् आप्तवाक्यम् इति आप्तवाक्याधिगम: विशिष्ट: अधिगमव्यूह: इति सिद्धान्तत: सप्रमाणम् सम्भावयितुं शक्यते ।

Gestalt महोदयस्य अन्तर्दृष्टिसिद्धान्तः अपि आप्तेन मार्गिता भवति इति निरूपितम् । Hull महोदयेन प्रतिपादितगुणाः अपि आप्तवाक्याधिगमे पूर्णतया वर्तन्त इति संभावयितुं शक्यते । अयम् आप्तवाक्याधिगमः शिशुविकासः, शिक्षा, परामर्शः, उद्योगं, मनोरोगोपचारः इति सर्वत्र उपकारकः भवति । उपबोधनक्षेत्रे (counselling) सुमहान् भवितुमर्हति ।

**सन्दर्भग्रन्थसूची**


1. चिन्तामणिग्रन्थः
2. तर्कसङ्ग्रहः
3. लघुमञ्जूषा
4. पूर्वमीमांसाशास्त्रम्
5. न्यायशास्त्रम्
6. Bandura- A social learning theory
7. Kohler, W - The Mentality of Apes, 1925